अथ वार्ताः

**प्रधानमंत्री-ओडिशा यात्रा**

प्रधानमन्त्री नरेन्द्रमोदी अद्य ओडिशा-राज्यस्य एकदिवसीय यात्रायां भविष्यति। स्वयात्रायाम् प्रधानमन्त्री झारसुगुडातः षष्टिसहस्रकोटिरूप्यकाणां बहुविधविकासपरियोजनानां उद्घाटनम्, शिलान्यासं च करिष्यति। एताः परियोजनाः दूरसञ्चारक्षेत्रे, रेलमार्गे, उच्चशिक्षायाम्, स्वास्थ्यसेवायां, कौशलविकासक्षेत्रे, ग्रामीण-आवास इत्यादिषु विविधेषु क्षेत्रेषु विस्तृताः सन्ति। अस्मिन् अवसरे श्रीमोदी सार्वजनिकसभाम् अपि सम्बोधयिष्यति। दूरसञ्चार-सम्पर्कस्य क्षेत्रे, प्रधानमन्त्री स्वदेशी-तन्त्रज्ञानेन प्रायः सप्तत्रिंशत्सहस्र कोटि-रूप्यकाणां व्ययेन निर्मितानां सार्द्ध सप्तनवतिसहस्र तोप्यधिकान् मोबाईल-4जी-टवर्स् इत्येतेषां उद्घाटनं करिष्यति। अस्मिन् भारत सञ्चार् निगम् लिमिटेड् (बि. एस्. एन्. एल्.) संस्थया नियोजिताः षड्शताधिक द्विनवतिसहस्र तोप्यधिकानि 4G प्रौद्योगिक-स्थलानि सन्ति। अवसरेऽस्मिन्, प्रधानमन्त्री ओडिशा-राज्यस्य बेरहामपुर्- गुजरातस्य सूरत्-नगरे उधना-नगरयोः मध्ये अमृतभारत्-एक्स्प्रेस्-रेलयानं हरितध्वजं प्रदर्शयिष्यति।

**प्रधानमन्त्री-बिहारयोजना**

प्रधानमन्त्री नरेन्द्रमोदी ह्यः प्रोक्तवान् यत् प्रशासनेन महिला-केन्द्रिताः बह्व्यः योजनाः कार्यक्रमाश्च च प्रचालिताः। एतैः कार्यक्रमैः समाजस्य सर्वेऽपि वर्गाः लाभान्विताः सञ्जाताः। बिहारराज्ये मुख्यमन्त्री–महिला–रोज़गार–योजनायाः शुभारम्भावसरे नवदिल्लीतः दृश्याङ्कन-माध्यमेन भाषमाणः श्रीमोदी अवदत् यत् केन्द्रसर्वकारः तथैव बिहारस्य मुख्यमन्त्रिणः नीतीश–कुमारस्य सर्वकारश्च एकीभूय महिला-कल्याणार्थं कार्यरतौ स्तः।

प्रधानमन्त्रिणा समुद्घोषितं यत् अस्याः योजनायाः अन्तर्गतं पञ्चसप्तति-लक्षाधिकाः महिलाः स्वबैंक–कोषेषु साक्षात् दशसहस्र–रूप्यकाणां लाभं अवाप्नुवन्। तेनोदीरितं यत् अस्याः योजनायाः आधारः एकादश-वर्षेभ्यः पूर्वं प्रधानमन्त्री–जनधन–योजना-माध्यमेन प्रतिष्ठापितः। सः सबलं प्रोक्तवान् यत् भ्रष्टाचारं विना साहाय्यराशिः साक्षात् महिलानां बैंक-कोषेषु प्रेष्यते।

**एन्. आई. ए.-हिज़्बुल्-**

राष्ट्रिय-अन्वेषण- अभिकरणेन (एन्. आई. ए.) इत्यनेन काश्मीर-उपत्यकायां भयोत्पादक-गतिविधीनां प्रोत्साहनाय प्रतिबन्धित-सङ्घटनस्य सक्रिय आतङ्कीनां कृते शस्त्राणां विस्फोटकानां आपूर्तौ संलग्नः हिज्बुल्-मुजाहिदीन्-इत्यस्य एकस्य आतङ्किनः समस्त सम्पत्तयः बन्धिताः। जम्मू-नगरस्य एन्. आई. ए. विशिष्ट-न्यायालयस्य आदेशानुसारं, अभिकरणेन अस्मिन् वर्षे अप्रैल-मासे गृहीतस्य आरोप-पत्रितस्य अभियुक्तस्य तारिख् अहमद् मीर् इत्यस्य समग्र सम्पत्तयः स्वीकृताः।

**नाड्डा-नोहमः**

स्वास्थ्य-परिवार-कल्याण-मन्त्री जे. पी. नड्डाः ह्यः दिल्ल्यां कार्यकारी-संचालन-समित्याः द्वितीय-सभायां राष्ट्रिय-एक-स्वास्थ्य-अभियानस्य (एन्. ओ. एच्. एम्.) इत्यस्य प्रगतिं समीक्षितवान्। श्री नड्डा मनुष्याणां, पशूनां,

पादपानां, पर्यावरणस्य च स्वास्थ्यस्य परस्पर-सम्बन्धस्य परिचये एन्. ओ. एच्. एम्. इत्यस्य भूमिकायाः उपरि बलं प्रदत्तवान्। मन्त्रिणा उक्तं यत्, केवलं मिलित्वा कार्याणाम् सम्पादनेन एव भविष्ये विभीषिकानां पूर्वानुमानं निवारणं च कर्तुं शक्यते इति।

**सञ्चार मन्त्रालयः**

डाक इति प्रैष्यशुल्के संशोधनं कृतम् (पत्राणां) पोस्ट-स्पीड -विभागेन अन्तर्देशीय-, विश्वसनीयतां, सुरक्षां, ग्राहक सौलभ्यं च वर्धयितु नूतनानि प्रकल्पानि अपि समारब्धानि। सञ्चार-मन्त्रालयः अवदत् यत् संशोधितं शुल्कं अग्रिममासस्य प्रथमदिनात् प्रवर्तयिष्यतीति।

**विंशति-प्रतिविंशतिः**

पुरुषाणां विंशति-प्रतिविंशतिः एशिया-चषक-प्रतिस्पर्धा दुबई-नगरे भारत-श्रीलंकादेशयोः मध्ये अन्तिमा- 'सुपर-फोर' क्रीडायाः अन्तर्गतं गतसायं सुपर ओवर इत्यनया पद्धत्या भारतेन विजयं प्राप्तम्। निर्णायक-स्पर्धा तावत् भारत-पाकिस्तानदेशयोः मध्ये श्वः भविष्यति। अवधेयं यत् परह्यः पाकिस्तानदेशेन बांग्लादेशः एकादश-अङ्कैः पराजित्य निर्णायक-स्पर्धायां स्वस्य स्थानं सुरक्षितम् आसीत्।

**।।इति वार्ताः।।**